"विष्कम्भः प्रीतिरायुष्मान् सौभाग्यः शोभनस्तथा ।
अतिगण्डः सुकर्म्मा च धृतिः शूलस्तथैव च ॥
गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ।
वज्रश्चाहक् व्यतीपातो वरीयान् परिघः शिवः ।
सिद्धः साध्यः शुभः शुक्लो ब्रह्मेन्द्रो वैधृतिस्तथा ॥"
तेषां वर्ज्जनीयभागा यथा,—
"परिघस्य त्यजेदर्द्धं शुभकर्म्म ततः परम् ।
त्यजादौ पञ्च विष्कम्भे सप्त शूले च नाड़िकाः ॥
गण्डव्याघातयोः षट् च नव हर्षणवज्रयोः ।
वैधृतिव्यतिपातौ च समस्तौ परिवर्ज्जयेत् ॥
शेषा यथार्थनामानो योगाः कार्य्येषु शोभनाः ॥"
अथ विष्कम्भादियोगानयनक्रमः ।
"रवीन्दुयोगलिप्ताभ्यो योगा भभोगभाजिताः ।
गतगम्याश्च षष्टिघ्ना नाड्यो भुक्त्यन्तरोद्धृताः ॥"
इति सूर्य्यसिद्धान्तः ॥
विष्कम्भादिसप्तविंशतिसङ्ख्यककालविशेषः । तत्-साधनमाह ।
"ग्रहकलाः सरवीन्दुकलाहृताः
खखगजैश्च भयोगमिती क्रमात् ।
अथ हृता स्वगतैष्यविलिप्तिका
निजजवेन गतागत नाड़िकाः ॥"
इति भास्करीयसिद्धान्तशिरोमणियोगाधिकाराध्यायः ॥ * ॥ यस्य ग्रहस्य नक्षत्रं ज्ञातुमिच्छति तस्य कलाः कार्य्याः । तथा चन्द्रार्कयोर्योगस्य कलाः कार्य्याः । उभयत्र शताष्टकेन हृते प्रथमस्थाने गतभानि । द्वितीयस्थाने गतयोगाः । अथ यान्यवशिष्टानि गतानि स्वस्थाच्च्युतानि गम्यानि स्युः तेषां गतानां सम्बन्धिन्यो विकलाः स्वस्वगतिभिर्भाज्याः । यल्लभ्यते ता गतनाड़िका भवन्ति । यदैष्याणां विकला भक्तास्तदैष्या घटिका भवन्ति । इति मिताक्षरानाम्नी तत्कृतटीका ॥ आनन्दयोगो यथा । भीमपराक्रमे ।
"अश्विनी यत्र सूर्य्येण सोमे च मृगशिरस्तथा ।
अश्लेषा भौमवारेण बुधे हस्तः प्रकीर्त्तितः ॥
अनुराधा गुरोर्वारे विश्वदेवस्तु भार्गवे ।
वारुणं शनिसंयुक्तमानन्दोऽयं प्रकीर्त्तितः ॥"
योगवरा यथा । दीपिकायाम् ।
"भूमिपुत्रार्कयोरह्नि नन्दा मघाश्लेषयाम्यान्त्यचित्राहिर्बुध्न्याश्विभिः ।
भार्गवेशाङ्कयोरह्नि भद्रा
भवेत् फल्गुयुग्मोडुसंयुता ॥
सोमपुत्रस्य वारे जया स्यान्मृगोपेन्द्रशूर्व्विन्द्रयाम्याभिजिद्वाजिभिः ।
गीष्पतेरह्नि रिक्ता च युक्ता यदा
विश्वशक्राग्नियुक्पित्रादित्यभुभिः ॥
सूर्य्यसुतस्य दिने यदि पूर्णा
ब्रह्मदिनाधिपतिश्रविष्ठैः स्यात् ।
योगवराश्चिभिरेव समेताः
सर्व्वसमीहितसिद्धिनियुक्ताः ॥"
अथमेव चान्द्रतयोगः ॥ * ॥ अथामृतयोगः ।
"ध्रुवगुरुकरमूलापौष्णभान्यर्कवारे
हरियुगविधियुग्मे फल्गुनी भाद्रयुग्मे ।
दिवसकरतुरङ्गौ सर्व्वरीनाथवारे
गुरुयुगनलवातोपान्त्यपौष्णानि कौजे
दहनविधिशताख्यामैत्रभं सौम्यवारे
मरुददितिभपुष्यामैत्रभं जीववारे ।
भगयुगजयुगाभ्यो विष्णुमैत्रे सिताह्ने
श्रवणकमलयोनी सौरिवारेऽमृतानि ॥
यदि विष्टिव्यतीपातौ दिनं वाप्यशुभं भवेत् ।
हन्यतेऽमृतयोगेन भास्करेण तमो यथा ॥
सर्व्वदेशाविशेषेण फलं स्याच्छुभयोगजम् ॥
अमृतं सिद्धियोगश्च यद्येकस्मिन् दिने भवेत् ।
तद्दिनन्तु भवेद्दुष्टं मधुसर्पिर्यथा विषम् ॥" * ॥
अथ सिद्धिदग्धपापयमघण्टयोगाः । यथा,—
"नन्दाद्याः सिद्धियोगा भृगुजबुधकुजार्कौर्य्यवारैः प्रशस्ताः ।
सूर्य्येशाशाब्धिषड़्द्रुद्रसुनिमिततिथयोऽर्कादिवारैः प्रदग्धाः ॥"
राजमार्त्तण्डे ।
"मासा रुद्रादिशो रामा षट्पञ्चमुनयस्तथा ।
दशान्ते तिथयः सप्त रथादिसप्तभिर्ग्रहैः ॥"
अपि च ।
"द्वादश्यर्कयुता भवेदशुभदा सोमेन चैकादशी
भौमे चापि युता तथैव दशमी नेष्टा तृतीया बुधे ।
षष्ठी नेष्टफलप्रदा सुरगुरौ शुक्रे द्वितीया तथा ।
सर्व्वारम्भविनाशविघ्नजननी सूर्य्यात्मजे सप्तमी ॥
पापोऽर्काद्दि विशाखात्र्ययमसुदुपस्थाद्रि चित्राचतुष्कं
तोयं विश्वाभिजिद्धं त्वय कुजदिवसे स्वत्रयं विश्वरुद्रौ ।
शाहे भूला विशाखा यमधनतुरगाम्बानि जैवेऽह्नि पित्रं
रोहिण्यार्द्रा यमेन्दूशतभमथ भृगोरह्नि पुष्याऽनवेन्द्रौ ॥
सौराह्ने हस्तयुग्मार्य्यमयमजयुक्पौष्णपुष्याधनानि
चक्षोऽखण्डसंयुक्ते स्वगृहपतिदिने सौम्यवारेऽर्य्यमापि ॥" * ॥
अथोत्पातादियोगाः ।
"रथादिदिवसैर्युक्ता विशाखादिचतुष्टतुः ।
उत्पाटा मृत्यवः काणा अमृतानि यथाक्रमम् ॥"
अथ करकचायोगः ।
"वाजिचित्रोत्तराषाढ़ा मूलपाशीष्यभात्मकाः ।
सूर्य्यादिवारसंयुक्ता योगाः करकचाः स्मृताः ॥"
अथ मृत्युयोगः ।
"आदित्यभौमयोर्नन्दा भद्रा शुक्रशशाङ्कयोः ।
बुधे जया गुरौ रिक्ता शनौ पूर्णा च मृत्युदा ॥"
अथ यमघण्टादीनां वर्ज्यकालनिर्णयः ।
"यमघण्टे त्यजेदष्टौ मृत्यौ द्वादश नाड़िकाः ।
अन्येषां पापयोगानां मध्याह्नात् परतः शुभम् ॥"
अथ शुभचन्द्रेण करकचादिशान्तिः ।
"अयोगेषु च सर्व्वेषु पूर्व्वयामं परित्यजेत् ।
अयोगाश्च विनश्यन्ति चन्द्रशुद्धिहता इमे ॥
करकचा मृत्युयोगाश्च दिनं दग्धं तथा परे ।
शुभे चन्द्रे प्रणश्यन्ति वृषा वज्रहता इव ॥" * ॥
विरुद्धयोगानां देशविशेषे प्रतिप्रसवो यथा ।
श्रीपतिः ।
"विरुद्धसंज्ञास्तिथिवारयोगा
नक्षत्रवारप्रभवाश्च ये वै ।
हूनाङ्गवङ्गेषु खशेषु वर्ज्याः
शेषेषु देशेषु न ते विरुद्धाः ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
अथ क्रियायोगः । सुनय ऊचुः ।
"दुःखाम्बुमग्नाः पुरुषाः प्राप्य ब्रह्म महालयम् ।
उत्तरेयुर्भवाम्भोधिं तथा त्वमनुचिन्तय ॥
इत्युक्तः स तदा प्राह क्रियायोगं महात्मनाम् ।
नराणामुपकाराय दुःखविच्छित्तिकारकम् ॥
वह्निरुवाच ।
आराधयध्वं विश्वेशं जगतां कारणं परम् ।
केशवन्तन्निरापेक्षा ह्येवमुक्तं प्रवाक्ष्यथ ॥
इष्ट्वा पूजानमस्कारैः शुश्रूषाभिरहर्निशम् ।
व्रतोपवासैर्विविधैर्ब्राह्मणानाञ्च तर्पणैः ॥
तैस्तैश्चात्महितैः कामैर्यैं स्वचेतसि तुष्टिदाः ।
भवेयुरपरिच्छेदादाराधयत केशवम् ॥
तन्निष्ठास्तद्गतधियस्तत्कर्म्माणस्तदाश्रयाः ।
तद्दृष्टयस्तन्मनसः सर्व्वस्मिन् स इति स्थिताः ॥
समस्तान्यथ कर्म्माणि तत्र सर्व्वात्मनात्मनि ।
संन्यस्यध्वं स वः कर्त्ता समस्तावरणस्य यः ॥
परः पराणां परमः स एको
नरोत्तमो यस्य पदन्न भिन्नम् ।
चराचरं विश्वमिदं समन्ता-
दचिन्त्यरूपन्तपरिग्रहं यत् ॥
तमाराध्य जगन्नाथं क्रियायोगेन वाड़वाः ।
अवौ मोक्षं परं जग्मुस्तस्मात्मोक्षकारणम् ॥
संसारार्णवमग्नानां विषयाक्रान्तचेतसाम् ।
विष्णुपोतं विना नान्यत् किञ्चिदस्ति परायणम् ॥
उत्तिष्ठंश्चिन्तय हरिं व्रजंश्चिन्तय केशवम् ।
भुञ्जंश्चिन्तय गोविन्दं स्वपंश्चिन्तय माधवम् ॥
यूयमेकाग्रचित्ता हि संश्रिता मधुसूदनम् ।
जन्ममृत्युजराग्राहं संसारं सन्तरिष्यथ ॥
क्रियायोगपराणीह मुक्तिकार्य्याण्यनेकशः ।
समाराध्य जगन्नाथं राजानो मोक्षमाप्नुयुः ॥"
इति वह्निपुराणम् ॥ * ॥
अथ योगसाधनम् । केशिध्वज उवाच ।
"योगस्वरूपं खाण्डिक्य ! श्रूयतां गदतो मम ।
यत्र स्थितो न च्यवते प्राप्य ब्रह्मलयं मुनिः ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धस्य विषयासङ्गि मुक्तेर्निर्व्विषयं तथा ॥
विषयेभ्यः समाहृत्य विज्ञानात्मा मनो मुने ।
चिन्तयेन्मुक्तये तेन ब्रह्मभूतं परेश्वरम् ॥
आत्मभावं नयत्येवं तद्ब्रह्मध्यायिनं मुने ।
विकार्य्यमात्मनः शक्त्या लोहमाकर्षको यथा ॥